# Vainayaka Trishati Namavali

# वैनायक त्रिशति नामावलिः

## Document Information

Text title : Vainayaka Trishati Namavali 300 Names of Vinayaka

File name : vainAyakatrishatinAmAvaliH.itx

Category : ganesha, trishati, shati, shatInAmAvalI, nAmAvalI

Location : doc_ganesha

Proofread by : Aruna Narayanan

Description-comments : See corresponding stotram

Latest update : June 1, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2023

*sanskritdocuments.org*

# वैनायक त्रिशति नामावलिः

॥ श्री गणेशत्रिशतीनामावलिः ॥

॥ ॐ गं गणपतये नमः ॥

ॐ गणेश्वराय नमः । गणक्रीडाय । गणनाथाय । गणाधिपाय । गजाननाय । गणपतये । नित्यानित्याय । निरामयाय । निर्मलाय । निष्कलाय ॥ १० ॥

ॐ नित्याय नमः । नादमध्ये प्रतिष्ठिताय । निधये । निधिप्रियपतये । नादातीताय । निधिप्रदाय । नदीनदभुजाय । नादजनकाय । विघ्ननायकाय । विनायकाय नमः ॥ २० ॥

ॐ विरूपाक्षाय नमः । वरदाय । विश्वपालकाय । विघ्नकृन्निघ्नचरणाय । गजदन्ताय । गजध्वनये । गणराजाय । गजश्रीदाय । गणपूज्याय । गणेष्टदाय नमः ॥ ३० ॥

ॐ नागाननाय नमः । निम्ननाभये । नित्यानन्दाय । निरङ्कुशाय । नलिनीकामुकाय । नित्यन्नित्यानित्यावतंसिताय । पूर्णानन्दाय । परस्मै धाम्ने । परमात्मने । परात्पराय नमः ॥ ४० ॥

ॐ परस्मै पदाय नमः । पशुपतये । तत्त्वम्पदनिरूपिताय । तत्त्वानां परमाय तत्त्वाय । तारकाय । तारककान्तकाय । तारकान्तरसंस्थानाय । तारकान्तकपूर्वजाय । हिरण्मयपुरान्तस्थाय । हृदयालाननिश्चलाय नमः ॥ ५० ॥

ॐ हृत्पद्मकर्णिकाशालिवियत्केलिसरोवराय नमः । हेरम्बाय । हवनाय । हव्याय । विधात्रे । विश्वतोमुखाय । विकर्त्रे । विश्वतचक्षुषे । वन्द्याय । वेदान्तगोचराय नमः ॥ ६० ॥

ॐ मदोत्कटाय नमः । मयूरेशाय । मोहिनीशाय । महाबलाय । महागणपतये । मेघनादाय । हृत्पद्मसंस्थिताय । हंसाय । हस्तिपिशाचीशाय । हृल्लेखामन्त्रमध्यगाय नमः ॥ ७० ॥

ॐ हर्षाय नमः । हव्यकव्यभुजे । कपर्दिने । कलभाननाय । कर्मसाक्षिणे । कर्मकर्त्रे । कल्पाय । कर्माग्रपूजिताय । वक्रतुण्डाय । विघ्नराजाय नमः ॥ ८० ॥

ॐ विद्यादाय नमः । विजयस्थिराय । विश्वकर्त्रे । विश्वमुखाय । कामदात्रे । कटङ्कटाय । कल्पकाय । कुमारगुरवे । किरीटिने । कुलपालनाय नमः ॥ ९० ॥

ॐ वैमुख्यहतदैत्यश्रिये नमः । वराहरदनाय । वशिने । वागीश्वरीपतये । वाचासिद्धाय । वायुसुकीलकाय । नन्दिप्रियाय । नगसुतानन्दनाय । निजसंस्थिताय । नष्टद्रव्यप्रदाय नमः ॥ १०० ॥

ॐ नादाय नमः । नारायणसुपूजिताय । उच्छिष्टगणाय । उच्छिष्टाय । उच्छिष्टगणनायकाय । उपेन्द्राय । उडुभृन्मौलये । उदारत्रिदशाग्रण्ये । पद्मप्रसन्ननयनाय । प्रणताज्ञानमोचनाय नमः ॥ ११० ॥

ॐ प्रत्यूहाज्ञानविज्ञानाय नमः । प्रत्यूहहिमहव्यभुजे । प्रत्यूहाम्भोधिकालाग्नये । प्रत्यूहगरलामृताय । मृत्युञ्जयाय । मुक्तिदात्रे । महानादाय । मदोत्कटाय । मदनावत्याश्रिताङ्घ्रये । मुद्गरायुधधारकाय नमः ॥ १२० ॥

ॐ शाकलाय नमः । शम्भुतनयाय । शक्तिजाय । शम्भुहास्यभुवे । शिवासुखावहाय । शम्भुतेजोभुवे । शम्भुकोपघ्ने । वाणीजिह्वाय । व्योमनाभये । वाग्मिने नमः ॥ १३० ॥

ॐ वासवनासिकाय नमः । वैनायकीसहचराय । विधृतालिसमूहकाय । स्तवाय । स्तुतिपराय । स्तव्याय । स्तुतितुष्टाय । स्तुतिप्रियाय । महालक्ष्मीप्रियतमाय । मातुलिङ्गधराय नमः ॥ १४० ॥

ॐ महते नमः । मदनावत्याश्रिताङ्घ्रये । महाबुद्धिमनोरमाय । मोहिनीमोहनाय । ज्येष्ठाय । ज्येष्ठराजाय । जगन्मयाय । ज्येष्ठपूजिताय । ज्येष्ठेशाय । ज्येष्ठराजपदे स्थिताय नमः ॥ १५० ॥

ॐ षडक्षराय नमः । षडाधाराय । षड्वक्रोपरिसंस्थिताय । षड्तुकुसुमस्रग्विणे । षण्मुखाय । षण्मुखाग्रजाय । रौद्रीमुद्रितपादाब्जाय । रुष्टचित्तप्रसादनाय । रुद्रप्रियाय । रुद्रपत्निपुत्राय नमः ॥ १६० ॥

ॐ रुद्रशिरोधराय नमः । रत्नमण्डपमध्यस्थाय । जपपूजनतोषिताय । जप्याय । जपाय । जपपराय । जिह्वासिंहासनप्रभवे । जितेन्द्रियेष्टसन्दात्रे । ब्रह्मेशाय । ब्रह्मणस्पतये नमः ॥ १७० ॥

ॐ ब्रह्माण्डकुम्भाय नमः । ब्रह्मस्थाय । ब्रह्मचारिणे । बृहस्पतये । हंसाय । हराय । हस्तिपतये । हर्षदाय । हव्यकव्यभुजे । हादिविद्याशक्तिपतये नमः ॥ १८० ॥

ॐ हृल्लेखामन्त्रमध्यगाय नमः । नामपारायणप्रीताय । नामनिष्ठवरप्रदाय । नार्मदार्चनसन्तुष्टाय । नागेन्द्रतनयाय । नटाय । निजानन्दसन्निषण्णाय । बालकेलिकुतूहलिने । ब्रह्ममूर्ध्ने । ब्रह्ममुखाय नमः ॥ १९० ॥

ॐ ब्रह्माण्डावलिमेखलाय नमः । बृहदारण्यसंवेद्याय । ब्रह्मणां ब्रह्मणस्पतये । मयूरनायकाय । मायापतये । मूषकवाहनाय । मन्दारपूजनप्रीताय । मन्दारकुसुमप्रियाय । मन्दारमूलसञ्जाताय । नागभूषणभूषिताय नमः ॥ २०० ॥

ॐ नागहारकटीसूत्राय नमः । नागयज्ञोपवीतवते । नागराजयोगदात्रे । नागकन्यासुशान्तिदाय । नारायणार्चितपदाय । संयोगानन्दविग्रहाय । सृष्टिस्थितिलयक्रीडाय । सर्वभेषजभेषजाय । सिन्दूरितमहाकुम्भाय ।
सामगानरताय ॥ २१० ॥

ॐ सुखिने नमः । तत्पदाय । तत्पदाराध्याय । तत्पदार्थस्वरूपवते । तत्त्वमस्याकृतिधराय । तत्त्वमस्यर्थविग्रहाय । तत्त्वमस्यर्थसंवेद्याय । आनन्दमूर्तिधारकाय । आधारपीठाय । आमोदाय नमः ॥ २२० ॥

ॐ आश्रिताभीष्टदायकाय नमः । आदिमध्यान्तरहिताय । आखुराजमहारथाय । निजभक्तप्रियतमाय । नरनारायणार्चिताय । नारायणश्रीपूर्वाङ्गाय । नटराजसुपूजिताय । निरालम्बयोगगम्याय । निदिध्यासवरप्रियाय । श्रीङ्कारशक्तिसंयुक्ताय नमः ॥ २३० ॥

ॐ श्रीपतये नमः । श्रीनिकेतनाय । श्रीङ्कारविग्रहाय । श्रीदाय । सिद्धिबुद्धिविनायकाय । विराजे । विश्वाय । वेदपतये । वेदकर्त्रे । विराड्भुताय नमः ॥ २४० ॥

ॐ विराड्पतये नमः । ऊर्ध्वलोकगताय । ऊर्ध्वविनायकाय । ऊर्जस्वते । ऊष्मलमदाय । ऊहापोहदुरासदाय । ऊनषोडशवर्षाढ्याय । तिर्यग्गतिविनाशकाय । तिथिमात्रसुसम्पूज्याय । स्थितिमात्रवरप्रदाय नमः ॥ २५० ॥

ॐ तत्त्वेष्टदाय नमः । तत्त्वपतये । तत्त्वातत्त्वविवेकदाय । भीमरूपाय । भूतपतये । भूपतये । भुवनेश्वराय । भूक्षेपदत्तलक्ष्मीकाय । भूतिदाय । सोमभूषणाय नमः ॥ २६० ॥

ॐ स्वतन्त्राय नमः । सत्यसङ्कल्पाय । सत्यसङ्कल्पदायकाय । स्वसंवेद्याय । सर्वज्ञाय । दण्डभृते । दण्डनायकाय । दक्षयज्ञप्रमथनाय । दयावते । दैत्यमोहनाय नमः ॥ २७० ॥

ॐ दिव्यवैभवसन्दात्रे नमः । असुरकुञ्जरभेदनाय । साक्षिणे । समुद्रमथनाय । सदसद्व्यक्तिदायकाय ।
स्वसंवेद्यासम्प्रज्ञात योगगम्याय । दन्तप्रभिन्नाभ्रमालाय । देवार्थनृगजाकृतये । दंष्ट्रालग्नद्विप घटाय । दैत्यवारणदारणाय ॥ २८० ॥

ॐ दुरासदगर्वहराय नमः । दिवोदासवरप्रदाय । नेतिकर्त्रे । नेतिपदाय । नेतिब्रह्मवरप्रदाय । नेतिस्वानन्दपददाय । नेतिशक्तिसमन्विताय । नेत्यसम्प्रज्ञातमययोगलभ्यसुविग्रहाय । ओङ्कारशक्तिसहिताय । ओङ्कारमुखराजिताय नमः ॥ २९० ॥

ॐ ओङ्कारवाच्याय नमः । ओङ्काराय । ओङ्कारपूर्णविग्रहाय । ओङ्कारमयविश्वात्मने । गङ्कारमन्त्रविग्रहाय । गङ्कारजपसन्तुष्टाय । गङ्कारभूमरूपवते । गङ्काराय । गम्मन्त्रवेद्याय । गम्ब्रह्मस्थितिदायकाय नमः ॥ ३०० ॥

इति विनायकरहस्ये ग्रन्थे ज्ञानसारं प्रथमभागे
नारदादि मुनीनां सूर्यभगवता प्रोक्ता
त्रयोदशाध्यायान्तर्गता वैनायक त्रिशति नामावलिः समाप्ता ।

Proofread by Aruna Narayanan

---

*Vainayaka Trishati Namavali*

pdf was typeset on June 1, 2023

Please send corrections to *sanskrit@cheerful.com*